"मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्योऽष्टौ प्रकीर्त्तिता: ॥"

सिद्धान्त:, पुं, (सिद्ध: अन्तो यस्मात् ।) पूर्व्वपक्षं निरस्य सिद्धपक्षस्थापनम् । इति भरत: ॥ (यथा, महाभारते । १ । ७० । ४३ ।
"स्थापनाक्षेपसिद्धान्तपरमार्थज्ञतां गतै: ॥")
तत्पर्य्याय: । राद्धान्त: २ । इत्यमर: ।१।५।४ ॥ नवविधज्योतिग्रन्था: । यथा । ब्रह्मसिद्धान्त:१ सूर्य्यसिद्धान्त: २ सोमसिद्धान्त: ३ बृहस्पतिसिद्धान्त: ४ गर्गसिद्धान्त: ५ नारदसिद्धान्त: ६ पराशरसिद्धान्त:७ पुलस्त्यसिद्धान्त:८ वशिष्ठसिद्धान्तश्च९॥ तन्त्राधिकरणाभ्युपगमसंस्थिति: सिद्धान्त: । स च चतुर्विध: । सर्व्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् सर्व्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थ: सर्व्वतन्त्रसिद्धान्त: ॥१॥ समानतन्त्रसिद्ध: परतन्त्रासिद्ध: प्रतितन्त्रसिद्धान्त:॥२॥ यत्सिद्धावन्यप्रकरणसिद्धि: सोऽधिकरणसिद्धान्त: ॥३॥ अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्त:॥४॥ इति गौतमसूत्रम् ॥ (तथास्य विवृतिर्यथा,—
"अथ सिद्धान्त: । सिद्धान्तो नाम य: परीक्षकैर्बहुविधं परीक्ष्य हेतुभि: साधयित्वा स्थाप्यते निर्णय: स सिद्धान्त: । स चोक्तश्चतुर्विध: । सर्व्वतन्त्रसिद्धान्त:, प्रतितन्त्रसिद्धान्त:, अधिकरणसिद्धान्त:, अभ्युपगमसिद्धान्त इति ।
तत्र सर्व्वतन्त्रसिद्धान्तो नाम सन्ति निदानानि, सन्ति व्याधय:,सन्ति सिद्ध्युपाया: साध्यानामिति प्रतितन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिंस्तन्त्रे तत्तत् प्रसिद्धं यथान्यत्राष्टौ रसा: षड़न्यत्र । पञ्चेन्द्रियाणि यथान्यत्र षड़िन्द्रियाणि। वाताधिकृता: सर्व्वविकारा यथान्यत्र वातादिकृता भूतकृताश्च प्रसिद्धा: ।
अधिकरणसिद्धान्तो नाम यस्मिन्नधिकरणे संस्तूयमाने सिद्धान्यन्यान्यपि अधिकरणानि भवन्ति। न मुक्त: कर्म्मानुबन्धिकं कुरुते निस्पृहत्वादिति प्रस्तुते सिद्धा: कर्म्मफलमोक्षपुरुषप्रेत्यभावा भवन्ति ।
अभ्युपगमसिद्धान्त: । अभ्युपगमसिद्धान्तो नाम यमर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा वादकालेऽभ्युपगच्छन्ति भिषज: । तद्यथा द्रव्यं न प्रधानमिति कृत्वा वक्ष्याम: । गुणा: प्रधाना इति कृत्वा वक्ष्याम: । इत्येवमादिश्चतुर्व्विध: सिद्धान्त: ।" इति चरके विमानस्थाने ८ अध्याय: ॥)

सिद्धान्ताचार:, पुं, (सिद्धोऽन्तो यस्य । तादृश आचार: ।) तान्त्रिकाचारविशेष: । यथा,—
"आत्मानं देवतां मत्वा यजेद्देवीञ्च मानसै: ।
सदा शुद्ध: सदा शान्त: सिद्धान्ताचार उच्यते॥"
इत्याचारभेदतन्त्रम् ॥

सिद्धान्ती,[न्]पुं, (सिद्धान्तोऽस्यास्तीति । इन्।) मीमांसक: । इति भूरिप्रयोग: ॥

सिद्धापगा, स्त्री, सिद्धसेविता आपगा ।) गङ्गा । इति हेमचन्द्र: ॥

सिद्धायिका, स्त्री, चतुर्व्विंशतिबुद्धशासनदेवतान्तर्गतदेवीविशेष: । इति हेमचन्द्र: ॥

सिद्धारि:, पुं, मन्त्रविशेष: । एतत्प्रमाणं सिद्धसाध्यशब्दे द्रष्टव्यम् ॥

सिद्धार्थ:, पुं,(सिद्धोऽर्थो यस्य ।) बुद्धार्हत्पिता । इति हेमचन्द्र: ॥ शाक्यसिंह: । इति मेदिनी॥ (सिद्धोऽर्थो यस्मात् ।) श्वेतसर्षप: । इत्यमर: । २ । ९ । १८ ॥ (यथा, भागवते । ४ । ९ ।५८।
"ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रिय: ।
सिद्धार्थाक्षतदध्यम्बुपूर्व्वापुष्पफलानि च ।
उपजह्रु: प्रयुञ्जाना व्यात्सल्यादाशिष: सती:॥")
अस्य पर्य्यायगुणा: गौरसर्षपशब्दे द्रष्टव्या: ॥ वटीवृक्ष: । इति राजनिर्घण्ट: ॥ प्रसिद्धार्थ: । यथा,—
"सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
ग्रन्थादौ तेन वक्तव्य: सम्बन्ध: सप्रयोजन: ॥"
इति व्याकरणटीका ॥

सिद्धार्था, स्त्री, (सिद्धोऽर्थो यस्या: ।) चतुर्थजिनमाता । इति हेमचन्द्र: ॥

सिद्धि:, स्त्री, (सिध + क्तिन् ।) दुर्गा । यथा,—
साधनात् सिद्धिरित्युक्ता साधका वाथ ईश्वरी॥"
इति देवीपुराणे ४५ अध्याय: ॥
ऋद्धिनामौषधम् । इत्यमर: । २ । ४ । ११२॥ योगविशेष: । निष्पत्ति: । यथा, मनु: ।२।९७।
"वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित्॥")
पादुका । अन्तर्द्धि: । वृद्धि: । इति मेदिनी ॥ मोक्ष: । इति हेमचन्द्र: ॥ (यथा, मनु: । १२ । ११ ।
"कामक्रोधौ तु संयम्य तत: सिद्धिं नियच्छति॥")
सम्पत्ति: । इति धरणि: ॥ बुद्धि: । इति शब्दरत्नावली ॥*॥ अष्टसिद्धिनामलक्षणानि यथा,
"अणिमा महिमा चैव लघिमा प्राप्तिरेव च ।
प्राकाम्यञ्च तथेशित्वं वशित्वञ्च तथापरम् ॥
यत्र कामावसायित्वं गुणानेतानथैश्वरान् ।
प्राप्नोत्यष्टौ नरव्याघ्र परनिर्व्वाणसूचकान् ॥
सूक्ष्मात् सूक्ष्मतरोऽणीयान् शीघ्रत्वाल्लघिमा गुण: ।
महिमाशेषपूज्यत्वात् प्राप्तिर्नाप्राप्यमस्य यत्॥
प्राकाम्यमस्य व्यापित्वात् ईशित्वं चेश्वरो यत:।
वशित्वात् वशिता नाम योगिन: सप्तमो गुण:॥
यत्रेच्छास्थानमप्युक्तं यत्र कामावसायिता ।
ऐश्वर्य्यं कारणैरेभिर्योगिन: प्रोक्तमष्टधा ॥"
इति मार्कण्डेये दत्तात्रेयालर्कसंवादे योगवक्षभनामाध्याय: ॥*॥ (अष्टादशसिद्धिनामानि यथा, ब्रह्मवैवर्त्ते । १ । ६ । १८—१९ ।
"अणिमा लघिमा प्राप्ति: प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च सर्व्वकामावसायिता ॥
सर्व्वज्ञदूरश्रवणं परकायप्रवेशनम् ।
वाक्सिद्धि: कल्पवृक्षत्वं स्रष्टुं संहर्त्तुमीशता ।
अमरत्वञ्च सर्व्वाङ्गं सिद्धयोऽष्टादश स्मृता: ॥")
भावनासिद्धिर्यथा,—
"तीर्थे काल्तेऽभीष्टदेवे गुरौ मन्त्रे भवौषधे ।
आस्था च यादृशी यासां सिद्धिस्तासाञ्च तादृशी ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे३९अध्याय:॥
ज्ञानात् सिद्धिर्यथा,—
"तस्मात् त्वमपि भूपाल देहि न्यायार्ज्जितं धनम् ।
दानात् ज्ञानं तत: प्राप्य ज्ञानात् सिद्धिमवाप्स्यसि ॥"
इति वह्निपुराणे शिवेरुपाख्याननामाध्याय: ॥

सिद्धिद:, पुं, (सिद्धिं ददातीति । दा + क: ।) वटुकभैरव: । इति तस्य स्तोत्रम् ॥ सिद्धिदातरि, त्रि । (यथा, देवीभागवते । ६ । २ । ५१ ।
"तं कुन्ती वचनं प्राह मम मन्त्रोऽस्ति कामद:
दत्तो दुर्व्वाससा पूर्व्वं सिद्धिद: सर्व्वथा प्रभो॥")
यथा च।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्द्दशी ।
प्रोक्ता मदनभञ्जीति सिद्धिदा तु महोत्सवे ॥"
इति तिथ्यादितत्त्वम् ॥

सिद्धियोग:, पुं, (सिद्धेर्योगो यत्र ।) तिथिवारघटितशुभयोगविशेष: । यथा,—
"शुक्रे नन्दा बुधे भद्रा शनौ रिक्ता कुजे जया
गुरौ पूर्णा च संयुक्ता सिद्धियोग: प्रकीर्त्तित: ॥
इति ज्योति:सागर: ॥

सिद्धियोगिनी, स्त्री, (सिद्धिप्रिया योगिनी ।) योगिनीभेद: । यथा,—
"प्रणवाद्याश्च या विद्या: शूद्रादौ न समीरिता:
अस्याश्चैव विशेषो यत् योषिच्चेत् समुपासयेत् ॥
डाकिनी सा भवत्येव डाकिनीभि: प्रजायते।
पतिहीना पुत्त्रहीना यथा स्यात् सिद्धियोगिनी"
इति तन्त्रसार: ॥ * ॥
दक्षस्य पञ्चाशत् कन्या: । तथा,—
"सती ज्योति: स्मृति: स्वाहा ह्यनसूया स्वधा तथा ।
प्रीति: क्षमा च संभूति: सन्नतिश्च अरुन्धती ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टि: श्रद्धा क्रिया मति:
बुद्धिर्लज्जा वपु:शान्तिस्तुष्टि: सिद्धिस्तथा रति:॥
अरुन्धती वसुर्यामी लम्बा भानुर्मरुन्धती ।
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा च नामत:
अदितिश्च दितिश्चैव दनु: कालादनायुषा ।
सिंहिका सुरसा कद्रुर्विनता सुरभि: खसा ॥
क्रोधा इरा च प्राधा च दक्षकन्या: प्रकीर्त्तिता:
पञ्चाशत् सिद्धियोगिन्य: सर्व्वलोकस्य मातर:॥"
इति वह्निपुराणे गणभेदनामाध्याय: ॥

सिद्धिली, स्त्री, (सिद्धिं लातीति । ला + क: । ङीष् ।) क्षुद्रपिपीलिका । इति केचित् ॥

सिद्धिस्थानं, क्ली, (सिद्धे: स्थानम् ।) पुण्यस्थानविशेष: । यथा,—
"अत: परं प्रवक्ष्यामि सिद्धिस्थानानि यानि तु